


ஸ்ரீ சிவன் சார்

॥ श्रीसद्गुरुशिवन् सार् अष्टोत्तरशतनामावलिः ॥

जीवन्मुक्तिमहानन्दसाक्षिभूताय योगिने।
महास्वामिकनिष्ठाय शिवार्याय नमोस्तु ते॥

1. शिवार्याय नमः
2. हरितगोत्रोद्भवाय नमः
3. ऋग्वेदिने नमः
4. होय्सालस्मार्तकर्णाटकब्राह्मणाय नमः
5. श्रीगोविन्दयज्ववंशोद्भवाय नमः
6. श्रीमहालक्ष्मीसुताय नमः
7. श्रीमच्चन्द्रशेखरेन्द्रानुजाताय नमः
8. श्रीस्वामिशैलनाथकुलदैवतेन रक्षिताय नमः
9. श्वेतारण्यक्षेत्रवासप्रियाय नमः
10. समीक्ष्य कारिणे नमः
11. श्रीमत् परमशिवेन्द्राचार्यकटाक्षपरिपालिताय नमः
12. श्रीसदाशिवब्रह्मेन्द्ररक्षिताय नमः

13. आरामपुष्पवाटिकाविधायकाय नमः
14. श्रीचन्द्रशेखरयतीश्वरश्लाघितपुण्यमूर्तये नमः
15. भक्तानुग्रहार्थगृहीतनरदेहाय नमः
16. सर्वजनानुकम्पमानसाय नमः
17. जितक्षुत्पिपासाय नमः
18. निमिषोन्मेषरहिताय नमः
19. वशीकृतसर्वेन्द्रियाय नमः
20. कुलधुरन्धराय नमः
21. स्वेतरहितवपुषे नमः
22. ऋतधाम्ने नमः
23. ऋजुमार्गबोधकाय नमः
24. आश्चर्यमेधाविने नमः
25. गुह्यतेजस्विने नमः
26. उन्नतकीर्तियुताय नमः
27. पक्षिमृगानुभाषिताय नमः
28. दुष्टजन्तुशमनशीलाय नमः
29. गुह्यविज्ञानमूर्तये नमः



30. प्रशान्तमूर्तये नमः
31. विशदमधुरवाचिने नमः
32. मौनशीलाय नमः
33. प्रियमोदप्रमोदविमुखाय नमः
34. ऋद्धिदायकाय नमः
35. चित्तविश्रान्तिदायकाय नमः
36. सङ्कल्पविकल्परहिताय नमः
37. लीलातरङ्गलीनज्ञानसागराय नमः
38. रागादिदोषविनाशकाय नमः
39. ज्ञानाञ्जनविमलनयनयुताय नमः
40. मिथ्योपचाररहिताय नमः
41. स्वच्छन्दचारिणे नमः
42. अनुग्रहशक्तियुताय नमः
43. सनातनसम्प्रदायोपदेशकाय नमः
44. अतिप्रश्ननिराकर्त्रे नमः
45. लोकहितकामाय नमः
46. निर्व्याजदयायुताय नमः

47. भुवनतिमिरहरणपवित्रभानवे नमः

48. बन्धपाशविमुक्ताय नमः

49. ऋषितुल्याय नमः

50. संसारक्लेशनाशकाय नमः

51. गुणग्राहिणे नमः

52. निरहङ्काराय नमः

53. अहङ्कारविनाशकाय नमः

54. भेषजवत्भोक्त्रे नमः

55. तपस्तप्तवपुर्धराय नमः

56. अतिमानुषशक्तियुताय नमः

57. स्थिरनिकेतरहिताय नमः

58. यदृच्छालाभसन्तुष्टाय नमः

59. एषणात्रयविनिर्मुक्ताय नमः

60. पराधीनजीवनोपायरहिताय नमः

61. जीवन्मुक्तस्वरूपिणे नमः

62. गोत्रगात्ररुद्राक्षाद्युपाधिरहिताय नमः

63. गृहीतात्मविद्याविलासाय नमः



64. भवरोगभेषजाय नमः

65. धर्मलोपासहिष्णवे नमः

66. अपरिग्रह रूपाय नमः

67. अगृहीतशिष्यवर्गायनमः

68. अमूल्यमनुजाभिवृद्धिग्रन्थकृते नमः

69. आप्तवाक्योपदेशकाय नमः

70. उदासीनवदासीनायनमः

71. गीतार्थभावकोविदाय नमः

72. सगुणोपासनबोधकाय नमः

73. भक्त्युपहितप्रीतमानसाय नमः

74. प्रारब्धकर्मपरिपालितवपुर्धराय नमः

75. शिलाशासनज्ञाग्रगण्यायनमः

76. पुरातनचरित्रविदे नमः

77. पद्मरेखाङ्कितहस्तपादयुताय नमः

78. एकाग्रचित्तभक्तिसुलभाय नमः

79. श्रेयस्साधननिधये नमः

80. पुण्यपुञ्जलब्धपुरुषाय नमः

81. आनम्रजनाभयदायिने नमः
82. आस्तिकजनरक्षकाय नमः
83. सर्ववर्णोपसेविताय नमः
84. भक्तहृत्तापशमनाय नमः
85. भक्तहृदयवासिने नमः
86. भक्तजनस्वप्नसञ्चारिणे नमः
87. भक्तजनहृद्दोषप्रक्षालनपटवे नमः
88. यतिमानसपूजिताय नमः
89. स्वभावमधुराय नमः
90. क्षणस्मरणविस्मरणशीलाय नमः
91. अद्वैतज्ञानसुबोधकाय नमः
92. मुक्तासनसमासीनाय नमः
93. यथार्थज्ञाननिर्देशकाय नमः
94. त्यागमात्रकर्तव्यत्वबोधकाय नमः
95. ऊर्ध्वनाडीमार्गसंवेदिने नमः
96. सूक्ष्मशरीरविहारपटवे नमः
97. भद्रप्रदपदाम्बुजाय नमः



98. नासिकाचूर्णगन्धाञ्चितस्वसान्निध्यसूचकाय नमः
99. निरुपमनिजानन्दजलधिमग्नाय नमः
100. आत्मारामायनमः
101. जाग्रत्सुषुप्तिस्वप्नविपिनदाहकाय नमः
102. आत्मसाम्राज्यसम्राजे नमः
103. एकान्तरमणशीलाय नमः
104. क्रान्तदर्शिने नमः
105. स्वानन्दभावे परितुष्टाय नमः
106. ईश्वरेण परिपालिताय नमः
107. अतिमुक्तमानुषाय नमः
108. सान्द्रानन्दसुधार्णवमहामत्स्याय नमः

श्रीसद्गुरुशिवन् सार् गुरवे नमो नमः